# ग्रन्थसमीक्षणम्–3

रमाकान्तपाण्डेयः

**वैयाकरणसिद्धान्तकौमुदी (अजन्तनपुंसकान्तो भागः) व्याख्याकारः – प्रो. अर्कनाथचौधरी, प्रकाशकः – जगदीशसंस्कृतपुस्तकालयः, जयपुरम् – 2008।**

शाब्दिकज्ञेषु धुरिकीर्तनीयोऽनेकग्रन्थप्रणयनप्रसारितकीर्तिकौमुदीको भट्टोजिदीक्षितप्रणीतसव्याख्यसिद्धान्तकौमुद्याः सर्वजनवेदिन्या राष्ट्रभाषा–निबद्धव्याख्याया निर्माणे सर्वतो भावेन संलग्नः सम्प्रति राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य जयपुरपरिसरस्य धुरमुद्वहन् प्राचार्य आचार्यः अर्कनाथचौधरी विद्वत्समवाये कस्य खल्वस्त्यपरिचितः। अनेन प्रणीत–व्याख्यासंवलितान् लघुसिद्धान्तकौमुदी–मध्यसिद्धान्तकौमुदी–प्रभृतिव्याकरणग्रन्थान् तर्कभाषा–तर्कसङ्ग्रहादि–न्यायग्रन्थान् मेघदूतादि च सरसकाव्यग्रन्थान् पाठं–पाठं समग्रोऽपि देशस्तमिमं सूत्रकारं व्याख्याकारं स्थापयति हृद्देशे। अयमपि स्वविद्याप्रावीण्येन चरितार्थयतीमामभियुक्तोक्तिं तर्केषु कर्कशधियो वयमेव नान्ये, काव्येषु कोमलधियो वयमेव नान्ये।

सिद्धान्तकौमुदीं समग्रस्य खलु शब्दशास्त्रस्य सारभूतां स्वीकुर्वन्ति शब्दतत्त्वविदः शाब्दिकसम्प्रदाये। क्वचिन्महाभाष्यादिग्रन्थव्याख्यानेऽपि प्रामाण्यमस्या अङ्गीकुर्वन्ति शास्त्रैकव्रतिनो मनीषिणः। तस्य च ग्रन्थरत्नस्य बालमनोरमाव्याख्यासहितस्य हिन्दीव्याख्यां पुरस्कृत्य न केवलं छात्राणां प्राध्यापकानामपि सुमहानुपकारो विहितः श्रीमता चौधरीमहोदयेन। ग्रन्थग्रन्थिभेदनपुरस्सरं रूपसिद्धिप्रकारादि प्रदर्शयता विदुषाऽनेन फक्किकादयोऽपि पारम्परिकपद्धतिपुरस्कृतिपुरस्सरं व्याख्याता इति ग्रन्थोऽयं सर्वथा सङ्ग्राह्यः।

**संस्कृतिरसायनम्, प्रणेता सम्पादकश्च–शम्भुदयालुः पाण्डेयः, प्रका. – शाम्भवीप्रकाशनम्, जोधपुरम्, 2008, मूल्यम् – अनुल्लिखितम्।**

संस्कृतिरसायनं नाम व्याकरणादिविविधशास्त्रेषु कृतभूरिपरिश्रमाणां श्रीमतां शम्भुदयालुपाण्डेयानां नूतनः काव्यसङ्ग्रहः। कवेः पितामहः श्रीमान्राजकिशोरपाण्डेय आसीत् विविधविद्याप्रस्थानेषु दक्षः

सनातनधर्मावलम्बी चेति कविमनसि तत्संस्कारा अहमहमिकया परापतन्त इव दृश्यन्ते। अत्र नैकेषु सांस्कृतिकविषयेषु काव्यानि निबद्धानि। पारम्परिकोऽपि भावोऽत्र क्वचिन्नवायते उत्पादयति च क्वचित्सहृदयहृदि संवेदनासंवलितां कामपि काव्यविच्छित्तिम्। यथा सरस्वतीस्तवने –

**यामाराध्य पितामहो विधिपदं लेभे विधत्ते जगत्,**
**विष्णुर्विष्णुपदं बिभर्ति सततं विश्वत्रयं त्रायते।**
**श्रीशम्भुः शिवतामुपेक्ष्य च शिवं धत्ते नरेभ्यः परम्,**
**भक्त्या तत्पदपूजनेन मुनिभिः किं किं न चक्रेऽद्भुतम्।।**

करालेऽस्मिन् काले भारतीयसंस्कृतेरुपेक्षां दर्शं दर्शं कस्य खलु संस्कृतिनिष्ठसत्पुरुषस्य चेतो न दूयते, को वा न करोति मुखेऽङ्गुलिं दृष्ट्वा पाश्चात्त्यप्रभावमिह युवसु युवतीषु च। क्व गतानि सम्प्रत्यस्माकं सांस्कृतिकमूल्यानि तानि यान्युपास्य देशोऽयं जगद्गुरुपदवीमारूढोऽभवत्। मातृदेवो भव, पितृदेवो भवेत्यादि शिक्षयन्ती भगवती श्रुतिरपि नैवाभिनन्द्यतेऽस्माभिरद्य। कालेऽस्मिन् सरलया संस्कृतगिरा संस्कृतिप्रधानं काव्यं विरच्य तन्महत्त्वं च प्रतिपाद्य नूनं महान्तमुपकारं समपादयत् समाजस्य श्रीमान् पाण्डेयः। अद्य गुरोः नास्ति समाजे कापि स्थितिः। वृत्तिजीवी भूत्वा जगतीस्ततोऽटाट्यमानः स न लभते कुत्रचिदपि शमिति कालेऽस्मिन् गुरोर्महत्त्वप्रतिपादनं छात्रेषु गुरुं प्रति श्रद्धामुत्पादयिष्यत्येव। अत्र गायति गुरोर्महिमानं श्रीमान्पाण्डेयः –

**मणिः शाणोल्लीढस्त्यजति स मलं द्राक् सहभवं,**
**गुणान् गुप्तान् सद्यः प्रकटयति च दीप्तान् प्रियकरान्।**
**गुणोत्कर्षान् मूल्यं विपुलतरभावं च लभते,**
**शिरोधार्यो ग्राह्यो नरवरजनैर्वा युवतिभिः।।**

तत्रैव गोमहिमा यथा –

**दुग्धेनैव घृतेन वा बलवता हैयङ्गवीनेन वै,**
**कुर्वन्तीह महोपकारमतुलं गावो नृणां सर्वदा।**
**यावज्जीवमिमाः परार्थघटका यच्छन्ति सौख्यं परम्,**
**मृत्वा ताः खलु चर्मणाऽप्युपकृतं कृत्वा दिवं यान्त्यहो।।**

एवंविधानि नैकानि काव्यानि निबद्धानि श्रीमता पाण्डेयकविनेह। सांस्कृतिकबोधसंवलितोऽपि काव्यसङ्ग्रहोऽयं काव्यत्वदृष्ट्याऽपि समृद्धिमानिति सर्वथाऽस्य समीक्षणे प्रचारे च प्रयासो विधेयः सुधीभिरिति दिक्।

**अयोध्यातीर्थप्रशंसा, सम्पादकः – डॉ. उमाकान्तचतुर्वेदी, हंसाप्रकाशनम्, जयपुरम्, 2008, मू. 200/–**

नृसिंहपुराणस्य सप्तचत्वारिंशत्तमोऽध्यायः 'अयोध्यातीर्थप्रशंसा' इत्याख्यां बिभर्तीति सुविदितमेव विपश्चिताम्। स चायमद्यावधि प्रकाशनं नैव प्रापदिति भूमिकायां स्पष्टमुल्लिखितम्। सम्पादकोऽस्य राष्ट्रियसंस्कृत–संस्थानस्य जयपुरपरिसरस्य साहित्यप्राध्यापको न्यायव्याकरणादि विविधशास्त्रेषु कृतभूरिपरिश्रमः श्रीमान् उमाकान्तचतुर्वेदी सुसम्पाद्य ग्रन्थममुमिदम्प्रथमतया प्राकाशयदिति नूनं सुमहानुपकारोऽयं संस्कृतजगतः। शास्त्रेषु निष्णातोऽयं सम्पादकः सम्पादनकलायामपि प्रवीण इति ग्रन्थदर्शनेन ज्ञातुं शक्नुवन्ति सुधियः। अत्र हि भूमिकाभागे सम्पादनसमस्यानां बहुधोल्लेखोऽनुसन्धित्सूनां महत उपकाराय कल्प्यते। सम्पादकमहोदयेनात्र अनुस्वार–पञ्चमाक्षर–व्यञ्जनद्वित्व–सन्धि–यतिप्रभृतयो विषया भृशं विचारिता भूमिकायाम्।

अयोध्यातीर्थप्रशंसेयम् अयोध्यापुरीस्थानि नानातीर्थस्थानानि पुरस्करोति। गो प्रहार–गुप्तहरि–स्वर्गहारप्रभृतितीर्थैः सह तिलोदकीनद्याः परिचयोऽपि प्रदत्तः। क्रमेऽस्मिन्नश्रुतपूर्वापि अयोध्यायाः पर्वतास्तथा चान्येऽत्र चर्चिता विषया नूनम् अयोध्यानगरस्य महत्त्वं ख्यापयन्तीति अयोध्यासम्बन्धितीर्थानां सम्पादनकलायाश्च परिज्ञानाय सङ्ग्राह्योऽयं ग्रन्थोऽनुसन्धित्सुभिरध्येतृभिश्चेति दिक्।

**स्तुतिकुसुमाञ्जलि का आलोचनात्मक अध्ययन, प्रणेता – उमाकान्तचतुर्वेदी, प्रका.– राष्ट्रीयसंस्कृतसाहित्यकेन्द्रं, जयपुर, 2009, मूल्य 300/–**

वाराणसीस्थकाशीहिन्दूविश्वविद्यालये पी–एच.डी. इत्युपाधिप्राप्त्यर्थं पण्डितप्रवरश्रीमदुमाकान्तचतुर्वेदमहोदयेन प्रस्तुतस्य प्रबन्धस्य संशोधितमिदं स्वरूपं 'स्तुतिकुसुमाञ्जलि का आलोचनात्मक अध्ययन' इति ग्रन्थरूपेण

प्रकाशितम्। पञ्चस्वञ्जलिषु विभक्तोऽयं प्रबन्धः। तत्र प्रथमाञ्जलौ कवेः परिचयप्रभृतयो द्वितीयाञ्जलौ काव्यस्य बाह्यपक्षः तृतीयाञ्जलौ अन्तःपक्षश्चतुर्थाञ्जलौ काव्यपक्षः पञ्चमाञ्लौ च दार्शनिकपक्ष इत्येते विषयाः सन्ति विशदं समीक्षिताः। अन्ते ग्रन्थोपसंहृतौ स्वीयाध्ययनस्य निष्कर्षोऽवतारितः श्रीमता चतुर्वेदेन।

ग्रन्थस्यैतिह्यपक्षं विशदयता ग्रन्थकारेण संस्कृतसाहित्ये स्तोत्रकाव्यपरम्परापीह संक्षेपेण निर्दिष्टा। स्तुतिकुसुमाञ्जलिटीकानां परिचयः विविधस्तोत्राणां परिचयस्तेषां स्तुतिकुसुमाञ्जलौ प्रभावोऽत्र विविधदर्शनानां प्रभावश्चेत्यादयो विषया भृशं समीक्षिताः।

श्रीमता चतुर्वेदेनोपनिबद्धेऽस्मिन् ग्रन्थे स्तुतिकुसुमाञ्जलि–समीक्षणव्याजेन जगद्धरस्य कवित्वं वैदुष्यं विषयप्रतिपादननैपुण्यं चापि समीक्षाविषयत्वं भजन्त इति स्तोत्राणां परम्परापरिज्ञानायाऽवश्यं सेवनीयोऽयं ग्रन्थः सुधीभिरिति दिक्।

**अभिनवकाव्यालङ्कारसूत्रविमर्शः, सम्पादकौ – डॉ. ए.वि. नागसम्पिगे डॉ. शङ्करनारायण अडिगश्च, प्रका. पूर्णप्रज्ञसंशोधनमन्दिरम्, कत्तरिगुप्पा मेनरोड, बेङ्गलूरु – 2009, मूल्यम्– 50 रुप्यकाणि।**

अभिनवकाव्यालङ्कारसूत्रविमर्शो नाम राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिमहोदयैः श्रीमद्भिः राधावल्लभत्रिपाठिचरणैः प्रणीतस्य अभिनवसिद्धान्तसंवलितत्वात् विद्वत्समवाये विमर्शविषयत्वं प्राप्तस्य अभिनवकाव्यालङ्कारसूत्रमित्याख्यग्रन्थरत्नस्य विमर्शात्मकलेखानां सङ्ग्रहः। पूर्वस्मिन् (जनुअरी – 2009) वर्षे बेङ्गलूरुनगरस्थसुप्रतिष्ठित–शास्त्राध्ययनसंस्थाने ग्रन्थममुमाश्रित्य राष्ट्रिया सङ्गोष्ठी समायोजिताऽभवत्। तस्यां सङ्गोष्ठ्यां चर्चिताँल्लेखान् पुरस्करोत्ययं ग्रन्थः।

अभिनवकाव्यालङ्कारसूत्रविमर्शात्मकेऽस्मिन् ग्रन्थे सप्तलेखाः सङ्कलिताः सन्ति। तत्र त्रिवेणीकविना अभिराजराजेन्द्रमिश्रेण निबद्धे 'अभिनवकाव्यालङ्कारसूत्रसमीक्षा' इति शीर्षके निबन्धेऽभिनवकाव्या–

लङ्कारसूत्रोक्तानि नैकानि तत्त्वानि सन्ति परिशीलितानि। मिश्रमहोदयो राधावल्लभं स्वच्छन्दचिन्तनपक्षधरं मनुते। विद्वद्वरेण्यानां एच.वि. नागराजरावमहोदयानां निबन्धे राधावल्लभोक्त–काव्यलक्षण–प्रयोजन–कारण–काव्यभेद–शब्दव्यापारादयो विषयाः समीक्षिताः सन्ति। शास्त्रसङ्गतिनिरूपणम् अलङ्कारस्वरूपनिरूपणञ्चेति द्वौ विषयौ डॉ. पी. सी. मुरलीमाधवन्महोदयैः विचारपदवीं प्रापितौ। आचार्यकोम्पेल्लराम–सूर्यनारायणमहोदयैस्तु कविव्यापारः अलम्भावोऽलङ्कारनिरूपणञ्चेति राधावल्लभाभिमतानि तत्त्वानि चर्चितानि सन्ति। ए.वी. देवीप्रसादशर्ममहोदयैः आभ्यन्तरालङ्काराः, डॉ. आर. गणेशमहोदयेन च काव्यविशेषविमर्शस्तथा च विरूपाक्षजड्डीपालमहोदयेन बाह्यालङ्काराः सन्तीह प्रतिपादिताः। ग्रन्थोऽयं श्रीश्रीविश्वेशतीर्थ– श्रीपादानाम् अनुग्रहसन्देशेन संस्थानकुलपतीनाम् आचार्यराधावल्लभत्रिपाठिमहोदयानां पुरोवाचा च समलङ्कृतो वर्तत इति। स्वीये पुरोवाचि श्रीमद्भिस्त्रिपाठिमहोदयैः अभिनवकाव्यालङ्कारगतः समग्रोऽपि विषयः परिशीलितः। सागरिकादिषु प्रकाशितानाम् एतद्विषयकनिबन्धानां निर्देशोऽपीह कृत इति तत्सर्वं जिज्ञासूनामनुसन्धित्सूनामुपकाराय स्यादेव।

अभिराजराजेन्द्रमिश्रेण अभिनवकाव्यालङ्कारसूत्रोक्त–सिद्धान्तानां स्वच्छन्दचिन्तनवादत्वेनापस्थापनं पुनर्विचारमपेक्षते। नहि राधावल्लभ–त्रिपाठिमहोदयैः स्वच्छन्दतयेह कल्पितसिद्धान्ता उपस्थिता अपितु शास्त्रेषु चर्चितास्ते ते सिद्धान्ता एव अभिनवतया परिकल्प्य युगानुरूपपरिवर्तनेन सहोपस्थापिता ग्रन्थेऽस्मिन्नि नो धीरिति दिक्।

**महिषशतकम्, प्रणेता– श्रीवाञ्छानाथः, सम्पादको– हिन्द्याङ्ग्लानुवादकश्च – प्रो. राधावल्लभत्रिपाठी, प्रका., न्यू भारतीय बुक कार्पोरेशन, दिल्ली, 2010, मू. – 250 रू.**

संस्कृतसाहित्ये श्रीवाञ्छानाथप्रणीतं महिषशतकं विडम्बनकाव्यत्वेन अन्यापदेशकाव्यत्वेन वा प्रसिद्धमस्ति। अष्टादशशतके प्रणीतमिदं काव्यं कवेर्वाञ्छानाथस्य जीवनवृत्तमपि पुरस्करोति। वाञ्छानाथः तञ्जौरराजसभापण्डित आसीत् किन्तु केषाञ्चिद् अधिकारिणां व्यवहारेण रुष्टः सन् स राजसभापण्डितपदं परित्यज्य कृषिकार्यं प्रारभत। तत्कृते

क्रीतं महिषमुपजीव्यैव कविः शतकस्याऽस्य रचनायां प्रवृत्तोऽभवत्। वस्तुतः कृषिकर्मणि स सुखं नानुभवति तथापि वृत्यर्थं तत्र प्रवृत्तो भवति –

**दुर्भिक्षं कृषितो नहीति जगति ख्यातं किल ब्रह्मणा –**
**मापद्धर्मतया मनौ च कृषिगौरक्षादिकं सम्मतम्।**
**भूपेष्वर्थपरेषु हन्त समये क्षुण्णे च दुर्भिक्षतो**
**वृत्त्यर्थं कृषिमाश्रयेम भुवि नः किं वा ततो हीयते।।**

महिषं विषयीकृत्य वाञ्छानाथेनाऽत्र स्वद्रोहिणां राज्याधिकरणां निन्दा व्याधायि। स्वीयां मनोव्यथां प्रकटयन् स वक्ति –

**कञ्चित् पश्वधमं लुलाय विगुणं कर्तुं प्रबन्धाञ्शतं**
**त्वामालम्ब्य समुत्सहे न खलु तद् वर्ण्यस्य माहात्म्यतः।**
**मद्रोहप्रवणाधिकारिहतकक्रोधेन तन्निन्दन–**
**व्याजात् तत्प्रभुतत्प्रभुष्वपि च वाग्दण्डो मया पात्यते।।**

महिषदशावर्णनेनेह तात्कालिकीं सामाजिकीं दशामप्याविष्करोति कविः। यथा –

**राजा मुग्धमतिस्ततोऽपि सचिवास्तान् वञ्चयन्तः खला**
**देशद्रोहपराः सदैव वृषलाः सर्वापहारोद्यताः।**
**आशां मा कुरु चोलदेशकृषये त्वं सैरिभातः परं**
**शिष्टं मे त्वलमल्लकं तदपि न भ्रातस्तवास्त्यन्ततः।।**

काव्यविषयीकृतोऽयं महिषः बहुधा स्तुतोऽभवत् कविना। अयं क्वचित् स्वामिरूपेण, क्वचित् भ्रातृरूपेण क्वचिद् बालकरूपेण क्वचिच्च राजरूपेण संस्तुतोऽस्ति। कवेर्व्यङ्ग्यदिग्धा वाणी नूनमुत्पादयतीह किमप्यपूर्वत्वम्। श्लेषप्रयोगे कवेर्निपुणताऽपि नाऽल्पीयसी। यथा त्वमेव नः राजा इति वदन् कविरत्र राजगतदोषान् अतीव नैपुण्येन महिषमाश्रित्य वर्णयति –

**सानन्दं महिषीशतं रमयसे मूर्धाभिषिक्तोऽन्वहं**
**त्वं बालव्यजनावधूतिमसकृत् प्राप्नोषि शृङ्गान्वितः।**
**किं च स्वां प्रकृतिं न मुञ्चसि तृणप्रायं जगत् पश्यसि**
**स्वस्ति श्रीमहिषेन्द्र तेऽस्तु नियतं राजा त्वमेवासि नः।।**

साम्प्रतिकसंस्कृतसाहित्ये महिषशतकमिदं विशिष्टं स्थानं भजते। इदं संस्कृतकविताया नवाविष्कारसम्भावना अपि पुरस्करोति। तस्यैतादृशस्य काव्यस्य हिन्द्याङ्ग्लयोः भाषयोरनुवादं कृत्वा विद्वद्वरेण्यः श्रीमान् राधावल्लभत्रिपाठी महान्तमुपकारं संपादयत् सहृदयानाम्। भूमिकायां विवृतं काव्यस्यास्य स्वरूपमैतिह्यं चापि महत् उपकाराय कल्प्येतेऽनुसन्धित्सूनाम्। ग्रन्थान्ते परिशिष्टेषु पाठभेदादिप्रदर्शनमपि ग्रन्थपरिशीलनाय अलं भवेदिति। ग्रन्थे संस्कृतटीकाया अभावः पण्डितानां मनसि खेदमुत्पादयेदिति आगमिनि संस्करणे तस्याः संयोजनं भविष्यत्येवेति नो विश्वासः।

*राष्ट्रियसंस्कृतसंस्थानम्,*
*जयपुर*

———000———